अशरानीश्वरः। अतएव सहभावनिरूपकत्वं नियतपूर्ववर्त्तित्वं कारणत्वं समवाय्यसमवायिनोस्तथात्वेन निमित्तेऽपि तथाभावात् अन्यथा प्रतिबन्धकाभावानन्तरं प्रतिबन्धकसत्त्वे कार्य्यं स्यात् प्रतिबन्धकाभावस्य पूर्वं सत्त्वात् न च कृतेः सहभावनिरूपकत्वं स्वतः कार्य्यसमयेऽभावात् तथा चैतत्परिचायितव्यापारद्वारा तस्याः सहभावनिरूपकत्वमतः शरीरव्यापारद्वारैव कृतेर्जनकत्वं न केवलाया इत्यपास्तम् समवाय्यसमवायिप्रतिबन्धकाभावानामविनश्यदवस्थत्वेन कारणत्वात् तथैवान्वयव्यतिरेकात् तेन तेषामभावे विनाशक्षणे च कार्य्यम्, अन्यथा प्रतिव्यक्ति कार्य्यसहभावनिरूपणे कार्य्योत्पत्तेः प्राक्सहभावस्य निरूपयितुमशक्यत्वात् कारणत्वानिश्चये क्वापि प्रवृत्तिर्न स्यादिति, तज्जातीयत्वस्यावश्यवाच्यत्वे विनश्यदवस्थं कथं सहभावेनापि व्यवच्छेद्यम् अतः स्वरूपयोग्यतारूपा कारणता तत्रापि, कार्य्याभावस्तु सहकारिविरहात् अन्यथा निमित्तानां प्रत्येकं कार्य्यसहभावनिरूपकत्वेन जनकत्वे गौरवं प्रागभावस्य प्रतियोग्यजनकत्वप्रसङ्गात् अन्यथा उत्पन्नोऽपि पुनरुत्पद्येत सामग्रीसत्त्वात्। न च स एव तत्र प्रतिबन्धकः अभावान्तरस्याकारणत्वेन तत्र कारणीभूताभावप्रतियोगित्वरूपस्य प्रतिबन्धकत्वस्य प्रागभावकारणत्व एव विश्रामात्। न चैकसामग्री एकदा एकमेव कार्य्यं जनयति स्वभावादिति वाच्यं सामग्रीतद्विरहस्य कार्य्यतदभावप्रयोजकत्वेन सामग्र्यां सत्यां कार्य्यस्य, तदभावे सामग्रीविरहस्य कार्य्याभावस्य वज्रलेपायितत्वात्। स्यादेतत् कर्त्ता शरीर्य्येव ज्ञानमनित्यमेव बुद्धिरिच्छाद्वारैव कृतिद्वारैवेच्छा हेतुरित्यादि प्राथमिकप्राप्तप्रत्यक्षविरोधात् नाशरीरनित्यज्ञानादिकर्त्तृसिद्धिः। अतएव शरीरमनित्यमेवेति नियमान्न कर्त्तृत्वेन नित्यातीन्द्रियशरीरसिद्धिरीश्वरे। न चाप्रयोजकं निरुपाधित्वेन शङ्काकलङ्कानवतारात् कार्य्यत्वसकर्त्तृकत्वयोर्यदि निरुपाधिकत्वमस्ति तदापि तुल्यबलत्वेन सत्प्रतिपक्षात् तत्प्रतिबन्धोऽस्तु। न च कार्य्यत्वं पक्षधर्म्मतासत्त्वाद्बलीयः कर्त्ता शरीर्य्येवेत्यादौ तन्नास्तीति वाच्यं ज्ञानमनित्यमेवेति व्याप्तेरेव ज्ञानजन्यत्वविरोधित्वात् एवं कार्य्यं ज्ञानजन्यं ज्ञानमनित्यमेवेत्यनयोर्विरोध एव अविरोधे तु द्वयमपि स्यात् तथा च क्षित्यादौ शरीर्य्यनित्यज्ञानपर्य्यवसाने विरोध एव स्यात्। किञ्च ज्ञानमनित्यमेवेत्यादौ नित्यज्ञानादेरप्रसिद्धेः तदव्यावर्त्तकतया नोपाधिनिश्चयस्तत्संशयोवा कार्य्यत्वसकर्त्तृकत्वव्याप्तिदशायां शरीरव्यापारव्यभिचारात् उपाधेर्निश्चयः संशयोवास्तीति तन्न ज्ञानमनित्यमेवेत्यादिव्याप्तेरसिद्धेः विपक्षे बाधकाभावेनाप्रयोजकत्वात् निरुपाधिसहचारदर्शनव्यभिचारादर्शनादेव व्याप्तिग्रहः। निरुपाधित्वमेव विपक्षे बाधकमिति चेन्न अवयवोमहानेव तेज उद्भूतरूपमेवेत्यादि व्याप्तिग्रहात् परमाणुनेत्रादेरसिद्धिप्रसङ्गः। अतएव चाक्षुषत्वेऽनेकद्रव्यवत्त्वस्य, साक्षात्कारे विषयेन्द्रियसन्निकर्षस्य हेतुत्वात् तन्मूलकविपक्षबाधकेन परमाण्वादिसाधकस्य बलवत्त्वात् परमाण्वादिसिद्धौ विरोधिव्याप्तेर्बाधः न तु वैपरीत्यं विपक्षे बाधकाभावेन तस्याबलवत्त्वादिति मन्यसे तर्हि ज्ञानादिकार्य्यकारणभावावधारणात् तन्मूलकविपक्षबाधकेन निष्कलङ्कव्याप्तिग्रहात् पक्षधर्म्मतासहकृतान्नित्यज्ञानादिसिद्धौ व्यभिचारान्न व्याप्तिः। अन्यथा साध्यं पक्षातिरिक्त एवेत्यादि निरुपाधिसहचाराद्व्याप्तिग्रहबलात् सकलानुमानोच्छेदः। वयन्तु ब्रूमः। पक्षधर्म्मताबलान्नित्यं ज्ञानं सिध्यत् बुद्धिरनित्यैवेति व्याप्तिप्रत्यक्षेण न प्रतिबध्यतेऽस्मदादिबुद्धिविषयकत्वेन भिन्नविषयकत्वात् एकविषयविरोधिज्ञानस्यैव प्रतिबन्धकत्वात् नित्यत्वानित्यत्वयोरेकजातीये द्वयेऽविरोधात्। बुद्धिमात्रेऽनित्यत्वावगमात् कथं तद्विशेषनित्यत्वबुद्धिरिति चेन्न बुद्धिमात्रस्येश्वरानीश्वरबुद्धिपरत्वे विरोधात् व्यभिचाराच्च अस्मदादिबुद्धिपरत्वे च भिन्नविषयत्वेनाप्रतिबन्धकत्वात्। बुद्धित्वं नित्यावृत्त्येवेत्यवगतमतस्तत्र कथं नित्यवृत्तित्वावगम इति चेन्न उभयसिद्धनित्यावृत्तित्वावगतौ विरोधाभावात्। बुद्धित्वमनित्यत्वव्याप्यमवगतं नानित्यत्वाभाववति ज्ञातव्यमिति चेत् अनित्यत्वव्याप्यमनित्यमात्रवृत्तित्वं तत्र चोक्तमेव। एतेन कर्त्ता शरीर्य्येवेत्याद्यपि ज्ञानं प्रतिबन्धकमिति निरस्तम्। ननु कर्त्तृजन्यत्वे जन्यत्वं नावच्छेदकं किन्तु घटत्वादिकमेव तेनैव रूपेणान्वयव्यतिरेकात् आवश्यकत्वाच्च अननुगतमपि जन्यतावच्छेदकं वह्निजन्यतायां धूमत्वादिवत्। अथ घटत्वादिवज्जन्यत्वमवच्छेदकं न हि विशेषोऽस्तीति सामान्यमप्रयोजकं तथा च वह्निजन्यत्वे धूमविशेषः प्रयोज्योऽस्तीति न धूमसामान्यमग्निं गमयेत् तस्माद्यद्विशेषयोः कार्य्यकारणभावः तत्सामान्ययोरपि बाधकं विना तथात्वनियमः। न तत्र बाधकाभावात् अत्र ज्ञानमनित्यमेवेत्यादि प्राथमिकबहुव्याप्तौ बाधात् तुल्यत्वेन व्याप्तिसंशयाधायकत्वात्। न च कार्य्यकारणभावमूलकत्वेन कार्य्यत्वव्याप्तिर्बलीयसीति वाच्यं विरोधिप्रत्यक्षेण कारणभावस्यैवासिद्धेः। एतेन धूमादौ वह्नित्वं जन-